শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে অষ্টপঞ্চাশং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে অষ্টপঞ্চাশং দশকম্॥

## দাৱাগ্নিমোক্ষাদিৱর্ণনম্

ৎৱযি ৱিহরণলোলে বালজালৈঃ প্রলম্ব -
প্রমথনসৱিলম্বে ধেনৱঃ স্বৈরচারাঃ।
তৃণকুতুকনিৱিষ্টা দূরদূরং চরন্ত্যঃ
কিমপি ৱিপিনমৈষীকাখ্যমীষাম্বভূৱুঃ॥ **58.1**॥

অনধিগতনিদাঘক্রৌর্যৱৃন্দাৱনান্তাৎ
বহিরিদমুপযাতাঃ কাননং ধেনৱস্তাঃ।
তৱ ৱিরহৱিষণ্ণা ঊষ্মলগ্রীষ্মতাপ -
প্রসরৱিসরদম্ভস্যাকুলাঃ স্তম্ভমাপুঃ॥ **58.2**॥

তদনু সহ সহাযৈর্দূরমন্ৱিষ্য শৌরে
গলিতসরণি মুঞ্জারণ্যসঞ্জাতখেদম্।
পশুকুলমভিৱীক্ষ্য ক্ষিপ্রমানেতুমারা -
ত্ত্ৱযি গতৱতি হী হী সর্ৱতোঽগ্নির্জজৃম্ভে॥ **58.3**॥

সকলহরিতি দীপ্তে ঘোরভাঙ্কারভীমে
শিখিনি ৱিহতমার্গা অর্ধদগ্ধা ইৱার্তাঃ।
অহহ ভুৱনবন্ধো পাহি পাহীতি সর্ৱে
শরণমুপগতাস্ত্ৱাং তাপহর্তারমেকম্॥ **58.4**॥

অলমলমতিভীত্যা সর্ৱতো মীলযধ্ৱং
ভৃশমিতি তৱ ৱাচা মীলিতাক্ষেষু তেষু।

ক্ব নু দৱদহনোঽসৌ কুত্র মুঞ্জাটৱী সা
  সপদি ৱৱৃতিরে তে হন্ত ভাণ্ডীরদেশে॥ **58.5** ॥

জয জয তৱ মাযা কেযমীশেতি তেষাং
  নুতিভিরুদিতহাসো বদ্ধনানাৱিলাসঃ।
পুনরপি ৱিপিনান্তে প্রাচরঃ পাটলাদি -
  প্রসৱনিকরমাত্রগ্রাহ্যঘর্মানুভাৱে॥ **58.6** ॥

ৎৱযি ৱিমুখমিৱোচ্চৈস্তাপভারং ৱহন্তং
  তৱ ভজনৱদন্তঃ পঙ্কমুচ্ছোষযন্তম্।
তৱ ভুজৱদুদঞ্চদ্ভূরিতেজঃপ্রৱাহং
  তপসমযমনৈষীর্যামুনেষু স্থলেষু॥ **58.7** ॥

তদনু জলদজালৈস্ত্বদ্ৱপুস্তুল্যভাভি -
  র্ৱিকসদমলৱিদ্যুৎপীতৱাসোৱিলাসৈঃ।
সকলভুৱনভাজাং হর্ষদাং ৱর্ষৱেলাং
  ক্ষিতিধরকুহরেষু স্বৈরৱাসী ৱ্যনৈষীঃ॥ **58.8** ॥

কুহরতলনিৱিষ্টং ৎৱাং গরিষ্ঠং গিরীন্দ্রঃ
  শিখিকুলনৱকেকাকাকুভিঃ স্তোত্রকারী।
স্ফুটকুটজকদম্বস্তোমপুষ্পাঞ্জলিং চ
  প্রৱিদধদনুভেজে দেৱ গোৱর্ধনোঽসৌ॥ **58.9** ॥

অথ শরদমুপেতাং তাং ভৱদ্ভক্তচেতো -
  ৱিমলসলিলপূরাং মানযন্ কাননেষু।
তৃণমমলৱনান্তে চারু সঞ্চারযন্ গাঃ
  পৱনপুরপতে ৎৱং দেহি মে দেহসৌখ্যম্॥ **58.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে অষ্টপঞ্চাশং দশকং সমাপ্তম্॥